CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

* ॐ नमस्तारिण्यै *

अथ

समस्यापूर्त्तिप्रकाशः

श्रीयुतधर्मरत्न के० सी० आई० ई०. सी० एस०
आईकर्नलाद्युपाधिमण्डनमण्डितविद्वज्जन-
मनोरञ्जनत्रिगर्त्तदेशाधिपतिजयचन्द्र-
वर्म्मभिर्वितीर्णेनद्रव्यसाहाय्येन

श्री १०८ स्वामितारानन्दतीर्थेन

प्रकाशितः।

संस्कृतभूषण-शुचित्रतशास्त्रिणा लक्षणपालेन
शोधितः।

शरच्चन्द्रलक्षणपालप्रबन्धेन "वाम्बे मैशीन यन्त्रालये"
लवपुरे मुद्रितः।

विक्रमाब्दः १९८२

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

समस्यापूरयितारः

(स्वामिनः)	पृष्ठे
श्री शान्त्यानन्दसरस्वती	३
„ दण्डिस्वामी विश्वेश्वराश्रमः	३
„ तारानन्दतीर्थपादाः	४
(काङ्कडेतरप्रान्तीयाः)	
पं० नृसिंहदेवशास्त्री दर्शनाचार्यः	५
„ हरदत्तशर्म्मा त्रिवेदी	५
„ रामप्रपन्नशास्त्री काव्यतीर्थः	६
„ दयाशङ्करः साहित्यवाचस्पतिः	९
„ भालचन्द्रः	१०
„ रामप्रतापशास्त्री सांख्यरत्नः	११
„ जगद्रामशास्त्री कविरत्नः	१२
„ देवशर्मा शास्त्री	१३
गुप्तदानिनः	२१
„ परमानन्दशास्त्री मैत्रेयः, संस्कृतभूषणः ...	२१
(काङ्कडाप्रान्तीयाः)	
„ रामकृष्णशर्म्माणः	२३
„ कृपारामशास्त्री	२५
„ कृपारामशर्म्मा	२६
„ जयदेव उपाध्यायः	२६
„ गुरुभक्तशर्म्मा	२७

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पृष्ठे

„ पद्मनाभशर्म्मा २७
„ वामनशर्म्मा पुरोहितः २८
„ पुलस्त्यराममिश्रः २९
„ कृपारामशर्म्मा (छत्तर) २९
„ यौवनप्रसादशर्म्मा पुरोहितः २९
„ सोमदत्तशर्म्मा ३०
„ बदरीदत्तशर्म्मा ३०
„ जगन्नाथशर्म्मा ३०
„ हरिचरणशास्त्री ३०
„ रामचन्द्रशास्त्री "कुशलः" ३५
„ शुचिव्रतशास्त्री संस्कृतभूषणः लक्षणपालः
(लवपुरम्) ३६

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

❋ विज्ञप्ति ❋

अयि काव्यामृतपानरसिकाः ! संस्कृतसाहित्यप्रचार-व्रताः !! विद्वद्वराः !!! विदितमस्त्विदमावेदनन्तत्रभवतां भवतां यदन्यान्यभाषासाहित्यप्रचारोपयोगविधयोऽजस्रम-नेकशस्सर्वैरेव चरीक्रियन्ते, परं भारतीयसभ्यतासंरक्षण मार्यमार्गप्रदर्शनं पुरुषैकनिष्पाद्यं चतुर्वर्गसाधनञ्च संस्कृत साहित्यप्रचारमन्तरेण न कथमपि साध्यते। स्फुटमेवेदन्तु यद्यस्मिन्देशे यादृशस्साहित्यप्रचारस्तत्र तदनुकूलमेव सभ्यता चरणादिकं सम्भवति। पुरातनैः पुरुषप्रवरैरप्यने-कश एतत्प्रचारादिशैवास्य धर्मैकप्राणस्य भारतस्य सभ्यता-सुशीलता-वदान्यता-धर्मप्रियताद्युदारगुणानां संरक्षणम-कारीति प्राक्तनेतिहासावलोकनेन सुस्पष्टमव गम्यते इति, "काव्यशास्त्रविनोदेन कालो गच्छति धीमता" मिति चा-भिध्याय परमहंसपरिव्राजकाचार्य्यं श्री १०८ स्वामितारा-नन्दतीर्थैः प्रत्यब्दं विदुषां काव्यनिर्माणकौशलाभिवृद्धये बहुफलमेतत् समस्याप्रकाशनमनुष्ठीयते। तत्र जातानुरागैः क्षात्रवंशालङ्करणत्रिगर्त्तेश्वरश्रीमन्महाराजजयचन्द्रमहोदयैः संस्कृतसाहित्यप्रचारमेवोपलक्ष्यात्मवित्तसाफल्येन बनूरी प्रभृतिस्थानेषु संस्कृतपाठशालाः संस्थाप्य दिष्ट्यैतत्समस्या-पूर्त्तिप्रकाशपुस्तकप्रकाशनव्ययभारोऽपि प्रतिवर्षं सानन्द-मुह्यते। पूर्ववार्षिके समस्यापूर्तिप्रकाशे समस्याकवीनां

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

निबन्धनैपुण्यमावेक्ष्य हस्तामलकवत्स्फुटमेव साहित्यस्य महानुपकारो दरीदृश्यते। अतश्च यतिवराणाममुमुदाराभिप्रायमाश्रित्यास्मिन्प्रारब्धकर्मणि समस्तविद्वद्भिर्निर्मत्सरैस्सानुमोदं सोत्साहं प्रवर्तितव्यम्। एवमतिवरिष्ठेऽस्मिन्कर्मणि प्रायः कांगड़ाप्रान्तीयविदुषामुपेक्षाप्यहेतुक्येवेति हेया, भ्रष्टच्छन्दस्काश्च्युतसंस्काराश्च समस्या नाग्रे प्रकाशयिष्यन्ते इति ध्येयमित्यलमनलपप्रार्थनया धीमत्सु। अनुचितं सानुकम्पं क्षमन्ताम्। पिपर्तु नित्यं न × कामाजगदीश्वरः। शिवमिति॥

निवेदको विदुषां कृपानुध्यायी—

गुरुभक्त शर्मा

श्रीजयचन्द्रनारिणीसंस्कृतपाठशाला—

प्रधानाध्यापकः बनूरी (कांगड़ा)

———

समस्याः—

(१) प्रवर्तते मे हृदयान्तराले। (२) तारे। (३) शिखरणी। (४) परिपालनीयः। (५) जालन्धरे। (६) गीर्वाणगीः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अथ समस्यापूर्तयः ।

त्रिवर्गदात्री त्रिपुरैः प्रपूज्या त्रियामहंत्री त्रिशिरास्त्रिमूर्तिः ।
त्रिकोणयन्त्रार्चितशारदैषा प्रवर्तते मे हृदयान्तराले ॥१॥

पीनोच्चवक्षोजनता शुभाङ्गी मुखस्रवद्वेदगिरामृतात्मा ।
रक्तेष्वरक्तेष्वपि तुल्यभावा प्रवर्तते मे हृदयान्तराले ॥२॥

बिम्बाधरोष्ठाद्गलितामृतेन मूर्तिं निराकृत्य सरस्वतीयम् ।
तारापुरे तारकमन्त्रदाया प्रवर्तते मे हृदयान्तराले ॥३॥

कटाक्षनिक्षेपमनःप्रभावा मुखेन्दुभासा हृतमोहपूगा ।
स्मेरास्यसञ्चारितशान्तिरूपा प्रवर्तते मे हृदयान्तराले ॥४॥

प्रवर्तिनिष्ठाथ निवर्तिनिष्ठा प्रकल्पिता यत्र चितिस्वरूपे ।
तदस्मि साक्षीति मतिः सदैव प्रवर्तते मे हृदयान्तराले ॥५॥

श्रीशारदापीठाधीश्वरजगद्गुरुशङ्कराचार्यश्रीः १०८
स्वामी शान्त्यानन्दसरस्वती (द्वारका)

यान्तारिकां पुष्पफलादिभिश्च प्रपूजेयद्यो मुनिवर्यमुख्यः ।
स तारिकानन्दमुनिश्च तारा प्रवर्तते मे हृदयान्तराले ॥६॥

त्रिगर्तनाथेन जयेन्दुनाम्ना तारां प्रतिष्ठापयति स्म शान्तः ।
तारापुरे रम्यगिरिप्रदेशे तन्तारिकानन्दयतिं समेयाम् ॥७॥

श्री १०८ दण्डिस्वामी विश्वेश्वराश्रमः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भगवति ! भवमध्ये भानुकोटिप्रकाशे
त्वमसि सकलभूते सारभूतेतितारे ।
निखिलनिगमसारे ब्रह्मविद्यावतारे
त्वमसि भुवनतारे तारशक्तिस्तु तारे ॥१॥

श्रीमन्महाराजमहीन्द्रतारापुरस्थितस्तेऽपि पुरानुगीतः ।
पाषाणरेखागतगद्यपद्यैरयं सुधर्मः परिपालनीयः ॥२॥

यदा दैवैस्तोष्या स्तवनविधिना भक्तिसुलभा
निराकारा तारा निखिलनिगमेनेति भणिता ।
तदा गीतागीता गतवचनवाच्यार्थगमिता
गिरौ गौरीमूर्तिर्भवति भवगेहे शिखरिणी ॥३॥

अये मातर्नीले भुवनततलीले तव महो
नपश्यन्पश्यन्यः परहतमतिः पामरजनः ।
अतस्त्वं कैलासे कविवरकुले काव्यलतिके
दवीयस्या मूर्त्या भवसि भवपूर्त्या शिखरिणी ॥४॥

ज्योतिर्मन्त्रमयी महेशमहिषी मेधाभिधापण्डिते
श्रीमन्नीलसरस्वती श्रुतिगताऽद्वैतार्थबोधात्मिका ।
एकानेकभवोद्भवा भगवती भूतिर्भवे भासुरा
पिङ्गोग्रैकजटातिजाड्यशमनी जागर्ति जालेन्धरे[1] ॥५॥

१—ब्रह्मरन्ध्रे निर्वाणचक्रं सूचिकागृहेतरं धूम्रशिखाकारं ध्यायेत्, तत्र जालन्धरपीठं मोक्षप्रदं भवतीति श्रुतिः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

गायत्रीगुरुमन्त्रमूर्तिरपरा त्र्यारे स्थिता तारिणी
भूरादित्रिपदी त्रिलोकजननी तुर्यार्धमात्रात्मिका ।
भक्तानुग्रहकारिणी भगवती भूदेववृन्दैः सदा
हंसः सोऽहमदश्चितिस्थितिकरी ज्ञेयास्ति गीर्वाणगीः ॥६॥

तारापुरस्थश्री १०८ तारानन्दस्वामिपादाः ।

तारे ! सुतारे ! परमेत्युदारे मारारिसारे भुवनैकहारे ।
अजादिदेवैर्धृतपादसारे सिताञ्जलिस्त्वामहमानतोऽस्मि ॥१॥
हृन्मालिन्यविधूननैकफतकः सद्भावसन्तानिका ।
सद्विद्याप्रकटीकृताखिलजगन्मिथ्याप्रवादोत्तरा ॥
गीर्वाणैः परिपीतसत्यसुरसा मृद्वीतिरस्कारिणी ।
कान्तेवारसिकारसै रसिजनैः सेव्यैव गीर्वाणगीः ॥२॥
वेदैकवेद्यः सुमनोऽभिवन्द्यः स्वर्गोत्तरः कीर्तिकरश्च लोके ।
परत्र पाथेयमणिर्द्वितीयो धर्मः सदा स्यात्परिपालनीयः ॥३॥
जालन्धरे देवि ! हृदैनसां मे जालन्धरे मायिनि विष्णुयोगः ।
जालन्धरे पुण्ड्ररसार्तिरेको जालन्धरेजालिनि सायकानाम् ४

नृसिंहदेवः शास्त्री दर्शनाचार्यः

किं वृथावादचर्चाभिः किं मुधापरिकल्पनैः ।
जालन्धरे धरे जालं पीठे नैव विलोकये ॥१॥
निष्फला देवताविद्या जरद्गीर्वाणगीर्गतम् ।
रूप्यकं सकलो देवः कलौ सर्वकरः स्मृतः ॥२॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सुरामांसैः पूजा जगति बहुधा कृतकुमतिभिः,
जिनैर्धूर्तैर्निन्दापथमपि नितान्तञ्च गमिता ॥
न वेदानां वादाः कलियुगनराणां स्मृतिमिताः,
सुरा तीर्थेन्द्राणी भवति तदपीत्थं शिखरिणी ॥३॥

तारे स्वभक्तार्तिहरे त्वयैव स्वभक्त सत्यप्रणयो हि शान्त्यै ।
स्थित्यै च सृष्टौ किल मुक्तिभुक्तौ सुरैःकृतोऽसौ परिपालनीयः ४

पीठे जालन्धरे रम्ये मन्ये गीर्वाणगीः स्वयम् ।
तारे शिखरिणीमूर्तिः वर्तते तव सुव्रते ॥५॥

परिपालनीयो भक्तोऽसौ प्रणयस्ते तथा स्वकः ।
पाठशालात्र येनेत्थं प्रचाराय सुनिर्मिता ॥६॥

पं० हरदत्त शर्म्मा त्रिवेदी (अमृतसरस्थः)

अथो देशेऽक्लेशे हरिहरविधीन्द्रादिवसतौ
कलौ मातस्तारे तव भवनमाला प्रविततता ॥
शुभैर्नानारूपैः सुहितकृतिहेतोः शिखरिणी-
त्यहो ते कारुण्यं जननि ! खलु जालन्धर इह ॥१॥

जालन्धरे स्थितिपदे सुखदे सुतारे

१—शिखरिणि पर्वते इति हेतोः तव कृपा करुणा। किञ्चात्र पद्ये यच्छन्दस्तदपि शिखरिणीत्येव। समस्यापदमप्येतदेव। २—पीठे।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

गीर्वाणगीः कृतिप्रभुः खलु पालनीयः ।
नैवेद्यकं शिखरिणी बहुधाम्बिके स्या-
दिष्टं विधेहि स्वपदार्चकमर्त्यवर्गे ॥२॥
आद्यपद्येऽत्र किं छन्दः किं समस्यापदं पदम् ।
तद्दाता प्रतिदाता शिखरिणीत्युत्तरं वद ॥३॥
तारेऽपारपयोनिधौ तव जनिर्वासोऽपि पद्मोदरे
रूपं स्त्री मृदुवस्तुनार्चनविधिर्ध्यानेन साम्यं दृशोः ॥
शान्तिः सन्ततमाश्रयते मनसि चेद्धर्मोद्धृतौ क्रुध्यसे
देवैः पारितमीक्षितुं न सहसा तत्कर्मरक्षोहतिः ॥४॥
तारे ! तरीतर्ति जालन्धरे सः सारे सरीसर्ति यस्तेऽङ्घ्रिकञ्जे ।
वारे जरीहर्ति पुण्यं सुधायाः पारे वरीभर्ति गीर्वाणगी शम् ॥५
तारे सदा ते चरणे सुशेते राकेशचक्रे यदयं सुखाय ।

१—समस्तमेतत् । २—भोज्यविशेषः । ३—आद्यपद्ये अथो इत्यादौ । ४—प्रेषकः । ५—पूर्तिकर्ता । ६—प्रश्नचतुष्टये शिखरिणीत्येवोत्तरं वद । तत्र प्रथमे शिखरिणीत्येव छन्दः, समस्यापदमप्येतदेव । तस्य समस्यापदस्य दाता प्रतिदाता च कुत्रास्ते इत्युत्तरं च शिखरिणि पर्वते इति । ७—हे सुधाया वारे अमृतप्रवाहरूपे इत्यर्थः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

न तस्य चित्तं व्यसनं सरोजन्दोदुह्यसे भद्रमतोऽसुनौवि[1]
तारे जनोऽयं परिपालनीयः गीर्वाणगीर्यस्य गिरोद्यमेन ।

जालन्धरे गच्छति संवितानं[2] स कोऽपि[3] गोपी[4] भजतेऽत्र योगम्[5]
न चित्तं[6] स्थिरं तेऽस्ति पादारविन्दे न वित्तंचलं मे च पूजानिमि
तथापि तारे परिपालनीयः कदापि चाङ्कोपरि लालनीयः ॥

द्विशुषिरवरकश्मीरेशदेशैकविज्ञः[7],
निजनृपकृपयाढ्यः शास्त्रिरामप्रपन्नः ।

१—प्राणनौकायाम् । अयं संसारः सागरः, तत्र मनुजजीवनं नौः दोलायते, विविधव्यसनक्लेशवातसमुत्थापितविषमोर्मिसमुद्घातैः, त्वन्तु तां स्थिरीकर्तुं पालयितुं पोषयितुं च तत्र भद्रं कल्याणकरं पदार्थजातं भृशं भूयो भूयश्च बिभर्षि इत्यर्थः । किञ्चात्रानुलोमप्रतिलोमतया पादादिपादान्तस्थैकैकवर्णोच्चारणे तारानन्दोविजयते इति वाक्यान्तरप्रतीत्या चित्रमेतत् ॥ २—संसृतिं प्रसिद्धिमुत्कर्षञ्चेति । ३—कोऽपि अनिर्वचनीयस्वभाव इत्यर्थः । ४—गोपीति गोपायति रक्षति शास्त्रं रहस्यविद्याञ्च । ५—योगं चित्तवृत्तिनिरोधरूपम् । किंच यः अगं पर्वतं तपश्चर्यार्थं भजते सोऽयं जनः परिपाल्य इति । ६—भुजङ्गप्रयातोपेन्द्रवज्रयोरुपजातिः । ७—द्विशुषिरोनाम द्विगर्तोदेशः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्रजमिह शुभपद्यै रत्नपुष्पैः सुग्रथ्य,
उपनयति स तारानन्दविद्वत्कराब्जे ॥

जम्बूराजकीयपाठशालाध्यापकः पं० रामप्रपन्न-
शास्त्री काव्यतीर्थः ।

जान्धरे शिखरिणीश्वरि नीलसज्ञे
नामान्तरैस्त्वमसि तच्च निधाय चित्ते ।
गीर्वाणगीरपि तथा वदतीति याचे
तारे त्वयाहमनिशं परिपालनीयः ॥१॥

वज्रेश्वरीत्यभिधया जगदम्बिके त्वं
जालन्धरे वससि पुण्यतमेऽत्र पीठे ।
रूपान्तरं तव ममान्तरवर्ति तत्स्यात्
तारे ! ततोऽहमपरं न परं हि मन्ये ॥२॥

हिमगिरिशिखरविहारिणि !
शिखिवाहनजननि ! शिखरिणीवृन्दैः ।
निजसौभाग्यविलुब्धै-
स्तारे तव शरणमिष्यते सततम् ॥३॥

गीर्वाणगीतगुणगौरवगुम्फितां त्वां
व्यय्यन्ततत्त्वमयमूर्तिमतीमवैमि ।

१—प्रह्वेत्यस्योपलक्षणत्वान्न दोषः ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तारे ततस्तरलवृत्तिमरं विहाय

त्वद्रूपचिन्तनपरायणततां श्रयेऽहम् ॥४॥

तारे ! तार्यस्त्वयासौ भवति भवजलरिन्नायको भीमरूप-

स्ताराधीशप्रिये त्वं तपनिरतजनैर्मन्यसे ताररूपा ।

मातस्ताराभ्रतारे दिविषदभिमते दृष्टिपातेन दृश्यो-

बालोऽयं कालभीतस्तयचयरहितस्त्वत्कृपापाङ्गतर्षः ॥५॥

भयान्वितेऽस्मिन्भववारिराशौ निमज्जतो मे शरणं किमन्यत्

तवानुकम्पामपहाय तस्मात्तारे ! त्वयाहं परिपालनीयः ॥६॥

कविरविशङ्करसूनुर्दयाशङ्करः साहित्यवाचस्पतिः,

गुर्जरप्रदेशे (सम्भातः)

श्रीविद्वद्वरवृन्दवन्द्यमनिशं शान्तिप्रदं सर्वदम्,

विद्यागारमनन्तकीर्तिमजितं सन्तापपापापहम् ।

रम्ये पण्डितवर्गदर्पदलने तारापुरे संस्थितम्,

तारानन्दमहं नमामि सुखदं भक्त्या सतां स्वामिनम् ॥१॥

भक्तानां भयहारिणी खलु सतां कीर्तिश्च विस्तारिणी

विद्याविग्रहधारिणी विनयदा सौख्यं सदा कारिणी ॥

सन्देहस्य निवारिणी कलिमलप्रोत्सारिणी हारिणी

दैत्यव्रातविदारिणी भगवती सेव्या मया तारिणी ॥२॥

तारे करुणागारे निःसारेऽस्मिन्सदैव संसारे ।

त्वं खलु परमोदारे सेव्या नम्रेण सेवकेन मया ॥३॥

तारामुदारां करुणैकवारां निधेर्निभां नौमि नितान्तनम्रः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यां विना साधकचित्तगम्यं रम्यं फलं कोऽपि कदापि दद्यात्

कविदयाशङ्करसूनुर्भालचन्द्रः (खंभातः)।

जानो भुवि सन्तु सन्ति सुधियस्तेषु त्वमेकः सुधीः,

न्यः श्रीजयचन्द्रदेव नृपते ! तुल्योऽस्ति ते राज्यभाक् ।

नाद्यापि पुरेव दैशिकजनाः प्रोत्साहिता वैबुधाः,

रारातिहरी भवाभवतरी पायाच्च गीर्वाणगीः ॥१॥

थं त्वामनु भाष्यते शृणु मया अन्यच्च किञ्चिच्छ्रुतम्,

र्गा योगपरायणो हि मनसा सञ्चिन्तयंस्ते हितम् ।

रानन्दयतिः सदाशुभमतिस्तारारती राजते,

कः सौम्यैकरोऽपरः खरकरो द्वावेव जालन्धरे ॥२॥

ये राजन् ! देव ! शृणु मम वचो ध्यानमनसा

दा रोगावासं यवनजनजैः क्रान्तसकलम् ।

लाहीनं दीनं बलधनहतं भारतमिदम्,

॥ हो यः पायात्सो निखिलजनजन्ये शिखरिणी ॥३॥

१—जयचन्द्रदेवे राज्ञि सौम्यगुणतादात्म्येन सर्वेषां ज्ञादपरत्वेन चन्द्रत्वारोपः। अत एव सौम्यकरश्चन्द्रः।

२—तारा आनन्दयतीत्यर्थे कर्मण्याणि तारानन्दश्चन्द्रः स्य यतिर्यमनं यत्र सूर्य एव अविद्यान्धकारनिवारणगुण म्येन खरकरत्वमिति सूर्यस्य दिवाप्रभवत्वात्, चन्द्रस्य रात्रावेवेति परमत्र द्वावेवेति चित्रम् ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अनसामनसासारे किं कार्यं साधकैर्नु संसारे
वदतः कारागारे स्वसमीपं प्रापय हे तारे ॥४॥
चीनाङ्गलजापानवराश्च देशा हा ! आपतन्तः परितोऽवलो
मातः ! त्वया भारतदेशदीनः हा शर्वतारे परिपालनीय
रामाभोगरताः सदामविकृताः प्रथयन्ति वित्तं यदा
तापाक्रान्तमनोविनोदपविवत् पश्यन्ति सर्वं हि ये ॥
शास्ता श्रीजयचन्द्रदेवनृपतिस्त्रीन्वै सुरानर्चयन्
तेषां ते भवने प्रयान्तु सततं वर्वर्ति जालन्धरे ॥६॥

पं० रामप्रतापः शास्त्री सांख्यरत्नः श्रौतस्मार्तमहा
विद्यालयप्रधानाध्यापकः (अमृतसर

प्रावीण्यं वेणुवाद्येऽतिहृदयहरतां हारमोनीयमाख्ये
मुख्यत्वं गोमुखाह्वे पणवपटहयोः पाटवं चारुचित्तम् ॥
वीणाशिक्षासुदाक्ष्यं स्वरसमयविदो दर्शयन्तो जयन्ति
रम्ये जालन्धरेऽधः कृतविबुधपुरीगायना उद्धवेषु ॥१॥
प्रोद्यद्बृहन्द्विमदान्धसिन्धुरघटाघण्टारवप्रस्फुर-
द्घोषोत्क्षिप्तवराङ्घ्रिदण्डलुलितब्रह्माण्डभाण्डोत्करः ॥
दृप्यद्दानवमानमर्दनचणो जालन्धरे प्रस्फुरन्
श्रेयो नो दिशतादहर्निशमलं त्रैविक्रमो विक्रमः ॥२॥
दुरन्यक्कृतसंसृतिप्रदतमःपाशा विपाशा धुनी
वैद्यः किल्विषजालजारणपटुः कालेश्वरो भास्वरः ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

राभक्तजनार्तिनाशनकृपावाप्तावतारा परा
ालापूर्वमुखी च सा भगवती जागर्ति जालन्धरे ॥

दिवामूकैर्घूकैः प्रतिपथमिता मूढमनुजैः
शृगालैर्वाचालैः प्रतिदिशमशून्यातिपिशुनैः ॥
प्रपूर्णा प्रत्यूहैः प्रतिपदमयं कण्टकशतै-
र्दुरारोहा प्रेम्णो रसिकवर ! हृद्या शिखरिणी ॥

कविप्रेष्ठं छन्दो रसशिवयति प्राणदयिते !
विरक्तैरासेव्यं पदमतिशुभं रूपमहिले !
कुशाग्रप्रज्ञे ! किं रुचिरयति गङ्गालहरिकाम्
भणेत्युक्ता भर्त्रा हरिणनयनोचे शिखरिणी ॥

ज्वालामुखीसंस्कृतपाठशालामुख्याध्यापकः
कविरत्नः पं० जगद्रामशास्त्री

काव्यसौख्यरहिता न हि मतिका
क्षेमपुष्पसहिता जनिलतिका ॥
तस्य यस्य हृदि ते सुखसरणिः,
कान्तिरस्ति जननीह शिखरिणी ॥१॥

यैव ते सुकरुणारससहिता
सैव मातरिह सज्जनमहिता ॥
वाच्यबालतरुलामतिधरणी
लक्ष्यपुष्परसगम्यशिखरिणी ॥२॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

जाड्यसन्तमसपालिविलसनं
नैव चेह खलु बुद्धिविवसनम् ॥

* मानसे खसदृशे
चन्द्रवर्त्महृदिमे सुखकारिणी ।
तारिका यदुदितास्ति शिखरिणी ॥३॥

लोक एष कठिनं खलगहनं
वासना च विषये परिणहनम् ॥
अत्र ये हि कुशलं जिगमिषव—
स्तेषु तेऽम्य सुविभाति शिखरिणी ॥४॥

हृदि यस्य ते विलसितं करुणांशैः
सदनानि तस्य रुचिराणि वतंसैः ॥
सरसीतटाश्च सुरसाः कलहंसैः
शुभसन्ततिः शिखरिणीसुतवंशैः ॥५॥

अयि तारिणि ! त्वदुदितौ न हि मोहः,
चरणाम्बुजे यदिह ते सुखदोहः ।
अत एव भक्तिरचला कलरोहा
मयि जायतां शिखरिणी विततोहा ॥६॥

भवभावभावनतया वनितायाः
सुखमस्ति मध्यभुजदेशमितायाः ।

---

* विकल्पेन पाठो बोद्धव्यः ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मतिरेवमत्र चपला ननु तेषाम् ,
न तवाम्ब ! भाः शिखरिणी हृदि येषाम् ॥७॥

तारे !

(युग्मकेन हारचित्रबन्धो लोमप्रतिलोमी)

संसाराङ्गीतं कम्पमानं दयातः
शीघ्रं नीले मां रम्यपादे सुतं नु ॥
कष्टेनाक्रान्तं कोमलत्वेन पायाः
हित्वाम्बां यस्माद् वत्सकेलौ विषादः ॥१॥
कवनकलवनङ्कम्प्रसूनुयर्तः
प्रविशति तरसा संश्रितेष्योहितम् ॥
त्वमपि मुदमिहास्मिन्वरं धारयेः,
वितर सुखसुवासश्चत्रित्वेक्षिते ॥२॥ !

एवं हाराकृतौ निवेशितं लोमप्रतिलोमसंज्ञकं पद्यं सुखं पठन्तु बुधा अनवद्याः । तद्यथाः—

करकोऽवनसहासः सहासं नवकोरकः ।
तनुयादनुते ! धात्रि ! त्रिधातेऽनुदयानुतः ॥

एतदर्थश्चः—हे-अनुते-कृष्णस्तुते ! हासेन सहवर्तमानो

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यो नवकोरकः-तद्रूपोऽवने रक्षणे शोभनहासवान्-ते करका
कोमलः पाणिः (कर्ता) नुतः-स्तुतः-त्रिधा दयाः तनुयात् ॥
(नु, इति वाक्यालङ्कारे) हे धात्रि ! इत्यपि सम्बोधनम् ।
एतदाधारश्लोकद्वयस्यापिः—

रम्यपादे नीले ! मातः संसृतिभीतमत एव कम्पमानं
कष्टेनाक्रान्तं सुतं कोमलत्वेन-उपलालनेन पाया रक्ष ।
यस्माद् अम्बां हित्वा शिशुक्रीडायां विषादो भवतीतिशेषः।
यतः शिशुतया-इतिभावः संश्रिता ईर्ष्या येन सः, अतएव
कम्प्रः कम्पनशीलः स चायं सूनुः कवित्वरूपं मनोहरं वनं तक
सा हितं यथास्यात्तथा प्रविशति । अतस्त्वमपि इह कवन-
वने अस्मिन् कम्प्रसूनौ वरं यथा तथा मुदं धारयेः प्रसन्ना
भवेत्यर्थः । हि त्रित्वे सत्त्वादिभावत्रये ईक्षितं निरीक्षणं
यस्याः सा त्वं सुखरूपं सुवस्त्रं च देहि-इत्यर्थः । न चात्र
सुख सुवासश्च त्रित्वेक्षिते इत्यत्र चकाराकारस्य युक्तपरत्वाद्
गुरुत्वमाशङ्कनीयम् प्रह्वेवेत्यस्योपलक्षणात्—तथाचोक्तम्—

यदातीव्रप्रयत्नेन संयोगादेरगौरवम्—
नच्छन्दोभङ्ग इत्याहुस्तदोषाय सूरयः । इति ॥

तापं साकं वितत्तकुगुणैर्हन्तु ते सुप्रसादः—
आरा दैच्छद्यम वनकरो नामयः शङ्खपाणिः ॥
देयाः सेवामपिच पतना भाव भासु प्रचारां

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भावी चैवं तव सुवदनो भावलभ्येऽम्ब दासः ॥१॥

येषां सोत्काश्चरणवरभाः शोकभावप्रपन्नाः

दीनावल्लीरिव शिवजलैः सम्भृतैर्मानहासैः ॥

सेवा थाञ्चा सुखशरण दा सिञ्चती सुस्थमूर्तिः

भाविन्यस्ता जनुषि कुरुते तेऽपि धन्या नु तारे ॥

अस्मिन् पद्यद्वये पूर्वेषु चतुर्षु पादाष्टकस्याक्षरेषु गुप्तं कन्याच्छस्कमेकं श्लोकं सोपानवन्धरीत्या बुधाः पठन्तु-तथाहि—

तारादेवी, येनासेवि–सारासेवी, सोऽनाथान्यः इति। छन्दोलक्षणन्तु (योगः कन्या) इति । अनाथेभ्यः-अन्यः सनाथ इत्यर्थः।किञ्चाग्रिमेषु त्रयोदशाक्षरेषु शशिवदनामन्वे-यन्तु गुप्ताम् शशिवदनान्याविति लक्षणात् ।

(तथाहि–तव पदभासः सकलसुखप्रः ।

शशिवदनानां वललवनस्थः ॥ इति)

आधारश्लोकयोरपि, हे अम्ब ! ते सुप्रसादः (कर्ता) कुगुणैः सह तापं नाशयतु । यं प्रसादं रक्षको दुःखहीनो विष्णुरैच्छत् (रामादावतारे) अपि च–अविनश्वरीं सेवां देयाः–एवं च हे अम्ब ! ते दासः सुवदनः सुमुखः साधुवाक्यश्च भावी ॥१॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अपि च–हे तारे! चरणयोः वरशोभावती, सुखद आद्या, सुस्थमूर्तिः ते–तव सेवा (कर्त्री) येषां भक्तानाम् शोचनीयतां गताः दीना लता इव (उत्काः कर्म्म) मानपूर्वकै हासैः शिवैर्जलैरिव सिञ्चती भाविनि जन्मनि–अस्ता कुरुते तेऽपि जना धन्याः ॥ इति सिञ्चत्यपि भाविनि-पद पुष्पोद्गमादिरूपे-अस्ताः विनष्टाः कुरुते इत्यपरभावादू विरो व्यङ्ग्यः। पुनर्जन्मनीति परिहारः। (यैर्हि श्रीभगवत्यास्तारि काया: सेवा कृता पुनस्तेषामिच्छालताङ्कुरवतीत्याशयः) मन्दाक्रान्ता वृत्तम् ॥२॥

(जालन्धरे)

हारिणीत्रितयी—

अक्षोभ्याख्यं तरलगरलं नागं विधायालिके ।
वक्षोदेशे नरवरशिरोमालाविभूषाधराम्,
तारां सारां त्रिपुरजयिनश्चेतोनिकेतं मताम्,
रामारामां भुवनभवनं पश्यन्तु जालन्धरे ॥१॥

चाम्पेयाली सुरभिशिशिरैः शम्भूमिकैः भावुकैः,
ग्रीष्मे भीष्मेऽप्यनिलवलनैर्धैर्य्यं ददत्सुन्दरम् ॥
भ्राम्यद्भृङ्गार्जुनविजयिनं केकिश्रितप्रश्रितम्,
ताराधारं विपिनतिलके पश्यन्तु जालन्धरे ॥२॥

कुल्यास्तुल्या अमरसरितो वाप्योऽपि पेयस्वपाः,
कामाराश्च प्रचललहरीमालासुजालाकुलाः ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मुग्धा येषां निकटवसतिः पीना कपीनां चमूः,
दृष्ट्वा बिम्बं ध्वनिमारिधिया धत्तेऽत्र जालन्धरे ॥३॥
स्रग्विणीसप्तकम्—

काममोहादिषड्वर्गसम्पीडिताः,
संसृतिक्षीणदेहाः सदेहातुराः ।
यान्तु तारापुरं तारिणीधारणाः,
सौख्यमेषां करिष्यत्यजालन्धरे[1] ॥१॥

लोभनीयं वनीवायुभिः पावनैः,
यापनैर्लोकशोकादिकानां रुजाम् ।
गुञ्जदम्भोजलीनैरलीनैर्युतं[2],
पश्य तारापुरं तत्र जालन्धरे ॥२॥

सारसैः[3] सा रसा[4] सारसा[5] सारसूः[6]
सारिकासारकासारशोभाधरे ॥
अम्ब ! ते पादपद्मैर्हि या मण्डिता
देवतासेवनीयेऽत्र जालन्धरे ॥३॥

---

१ एषां पीडितानां सौख्यं धरे पर्वते अजा जन्मवर्जिता अलं पर्य्याप्तं करिष्यति ॥

२ गुञ्जदम्भोजलीनैरलीनैरितिविरोधः-अलीनाम् इनैः स्वामिभिरिति परिहारः ॥

३—पक्षिविशेषः । ४—सा पृथिवी । ५—सशब्दा । ६—सारस्रवित्री ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वन्दिताशापुरी यत्र तापापहा
कृत्तयत्रूंश्च शत्रूंस्तनोत्यद्भुतम् ।
वैद्यनाथश्च पाथोनिधेः संसृते-
स्तारको नेत किं तत्र जालन्धरे ॥४॥

कोकिलालापिनोऽनोकहाः शोकहाः,
संस्तवंयद्भिरन्तीव पुण्यन्तव ।
अम्ब ! मन्ये हि वन्येष्वपि प्रार्थिषु,
तत्कृपा ते जडेष्वत्र जालन्धरे ॥५॥

ये वहन्तीहमातर्नखेन्दुप्रभम्,
ते पदं कोऽपि तेषां हृदब्जेऽमले ।
यद्विकासो न तच्चित्रमस्माद् यतः,
वेधसः सृष्टिरास्ते न जालन्धरे ॥६॥

विधातुः सृष्टौ चन्द्रोदये कमलसंकोचः प्रसिद्धः ।

गीर्वाणगीः

तारिके ते वनीमागता ये नराः,
सौख्यकोटिं गताः शाश्वतीं ते ऽमराः ।
शब्दसार्था कृतार्था गुणैर्वाणगीः,
तुल्यरूपा मतैषां च गीर्वाणगीः ॥१॥

१ वाणगीः वाणभट्टस्य वाणी ॥

श्रीमतो गौरीशंकरालब्धतनुर्देवशर्म्मा शास्त्री
पालमपुर, कांगड़ा ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

धृतदैत्यमुण्डहारे प्रललज्जिह्वेऽतिभीषणाकारे ।
ब्रह्माण्डभेदिविद्युन्निधिदृक्तारे नमो नमस्तारे ॥१॥
क्रुद्धैर्बौद्धैरवज्ञाता दानवैर्दारिता नखैः ।
मानुषैर्मानिताऽप्येषा गता गीर्वाणगीर्दिवम् ॥२॥
गीर्वाणगीः शिखरिणी परिपालनीयो-
र्जालन्धरे प्रथितपञ्चमिकाः समस्याः ।
तारापुरात् प्रचरिता भरिताश्च विज्ञै-
र्मुद्रापिताश्च यतिना जयचन्द्रदेवैः ॥३॥
जालन्धरे शिखरिणी तुहिनाद्रिमूर्तिः
गीर्वाणगीः सुमधुरा जगताऽऽद्रिता च ।
रुद्धो बलेन रिपुणा शरणागतश्च,
तारे दयाधिकरणे परिपालनीयः ॥४॥

(गुप्तदानिनां केषामपि रामचरणव्रतानाम्)

* शिशोर्हस्ताच्छैले वत शिखरिणीह स्थितिजुषः,
मरिष्यामोऽधस्तात् अहह नितरां प्रच्युतिमिते ।

---

* शिशोरित्यादिपद्यस्यायमाशयः=यदा भगवता कृष्णचन्द्रेण गोकुलं गोपकुलं च शक्रवज्रात् परित्रातं गोवर्धनगिरिमुत्थाप्य, तदा तदधस्था गोपाः श्रीकृष्णमहिमानमजानन्तश्चिन्तयामासुर्यत् अयं नितरां शिशुरस्तीति पर्वतधारणेऽक्षमः । तस्मात् अस्य हस्तात् सति पर्वतप्रच्यवेऽधो मरिष्यामः । अन्तर्यामी चासौ मनोभावान् विज्ञाय स्मितमकरोदिति ॥१॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मनोभावान् तेषामिति परिविभाव्यैव भगवान्,
स्मयन् देवोऽपायात् जगदवतु नित्यं गिरिधरः ॥१॥
मया लब्धव्या सा कथमिह पुनश्चित्तचटुला ।
ललामा भावानां विविधभवभूत्या भवजुषाम् ।
सुभुक्ता या किञ्चित् कलयति परं प्रेम मधुरम् ।
सखे ! का कान्ता सा ? नहि नहि रसाला शिखरिणी ॥
विभोःसत्ताज्ञानं क नु भवति संमुग्धमनसाम् ?
सदा सेवासक्ता मधुबलिरिपोः काथ दयिता ?

---

(१) भवः=जन्म । अत्रापन्हुतिः ॥२॥

विभोरिति=अत्र पद्ये "भग्नोत्तर-वृत्तनामक" जाती । तल्लक्षणे यथाह धर्मदासः—"यत् पृष्टं प्रश्नवाक्येस्यादादि-मध्यान्तसंस्थितम्" इति "वृत्तनामोत्तरंपृष्ट" मित्यादि च ॥

अत्र सर्वप्रश्नानां "शिखरिणी" ति उत्तरम् । तथा हि प्रथमस्य शिखरिणी, पर्वते (उपह्वरे इति लभ्यते)। तदुक्त-मृचा="उपह्वरे गिरीणां संगमे च नदीनाम् । (इत्यादि अष्टममण्डले ऋक् वेदे)। " द्वितीयस्य विष्णोः सेवासक्ता "ई"=लक्ष्मीः ॥ तृतीयाय "शिखरिणी" उत्तरम्, तदुक्तम् "एलालवङ्गकर्पूरसुरभिद्रव्यमिश्रितम् । दुग्धेन सह गालितं । सिता संगतं वै दधि इति प्र० क० ल० ३३ पृष्ठे रेवतीका-न्तेन ॥ चतुर्थस्योत्तरं "शिखरिणी" इति । सीता स्त्रीषु शिखरिणी इति ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

लवङ्गैलाकर्पूरदधिमधुरा का च सासिता ?
पतिप्राणा सीता पदमधिगता किं ? शिखरिणी ॥३॥
धर्म्ये चावतरन्तम् कलौ च नो, वीक्ष्य नास्ति चित्रं मे ।
यस्मात् वर्षति मेघो हिमवति नित्यं शिखरिणीति ॥४॥
संसारेऽस्मिन् असारे सकलसुखकरे जान्हवीतुल्यनीरे ।
निश्शेषस्यैकसारे निखिलभयहरे पुण्यजालन्धरे यः ।
यस्मिन् भूतैकनाथः जयति मखमथः कालनाथः शिवार्थः ॥
तारापूःस्थो नगस्थोऽसौ मम सुजनमभूः वैद्यनाथः सुनाथः॥५॥
यं धर्मपादपनवाङ्कुरमस्यदीयैः
पूर्वैरसिच्यत निजैः रुधिरप्रवाहैः ।
सोऽयं तरुः प्रचुर पुष्पफलाप्तकीर्तिः
आर्याः ! भवद्भिरधुना परिपालनीयः ॥६॥
भानोः प्रतापादधिकं जगत्यां सन्ताप्यते वालुचयेन यस्मात्
वर्ज्येतरालुब्धवलन्तु तस्मात् स्वभावभाग्यः परिपालनीयः ॥

परमानन्दमैत्रेय शास्त्री, संस्कृतभूषण, साहित्यशास्त्री;
मैनेजर, धर्म विद्यालय सं० २, हवेली लालचन्द,
चिट्टा कटरा, अमृतसर ॥

आकारोपरि विद्रुमच्छविचणं पङ्कैरुहं शोभते ।
तस्योर्ध्वे हिमशुभ्रचारुजलजं टांकारमूर्ध्नि स्थितम् ॥
तस्योच्चैः स्थितकूर्चबीजविलसत्सन्नीरजं चारुणम् ।
हूंकारोपरि राजते शिखरिणी काचिद् विचित्रच्छविः ॥१॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यस्यां रज्जुभुजङ्गवज्जगदहो येध्यस्तमाहुर्बुधाः ।
सर्वं खल्विति नेति नेति वचनैर्ब्रह्मेति या गीयते ॥
सर्वज्ञैरपि या च नेह मुनिभिः सम्यक्परिज्ञायते ।
अर्वाचीनजनैः कथं शिखरिणी सा ज्ञातुमत्र क्षमा ॥२॥

मूलं यस्य जगत्तरोरुपरिगं शाखा ह्यधस्तात्स्मृता ।
नैतल्लौकिकवस्तुमात्रविषये दृष्टो विचित्रक्रमः ॥
तस्यान्वेषणदक्षपूज्यमुनिभिः सिद्धान्तितं तन्वतो ।
ब्रह्माण्डोपरि चिन्मयी शिखरिणी मूलायतेऽन्येप्यधः ॥३॥

महामाये काये समजननिकाये विहरसे ।
सुभव्ये भूतानां भवभवदवाग्निप्रशमिनी ॥
त्वमेवाम्बा ज्ञेया जगति जनगेयो न हि परे ।
यतः कात्रेशास्ते पदतलगतास्त्वं शिखरिणी ॥४॥

ज्वाला यत्र धगद्धगज्ज्वलति भो भूरन्ध्रजालन्धरे ।
मुक्तिर्नृत्यति नित्यमेव सुलभा सद्भावजालन्धरे ॥
धन्या त्वं वहसे समस्तजनताशैलादिजालन्धरे ।
विद्वांसोऽर्थचतुष्टयं सुमनसः पश्यन्ति जालन्धरे ॥५॥

काश्यां यच्छति धूर्जटिर्भगवान्मुक्तिं जनेभ्यः सदा ।
किन्त्वत्रापि हि वर्ण्यते मुनिवरैः सा भैरवीयात्मना ॥
आयासेन विनैव सात्र सुलभा वाञ्छास्ति चेन्मानवाः ।
शीघ्रं पुत्रकलत्रमित्रसहिता आयान्तु जालन्धरे ॥६॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तारानन्दयतीन्द्रमानसमुदे याऽऽविर्बभूव स्वयम्,
यस्याः सुन्दरमन्दिरं दरहरं पूर्णप्रतापो महा-
राजः श्रीजयचन्द्रवीरनृपतिः सच्छ्रद्धया निर्ममे,
साम्बा मे भववर्धितारणतरिस्तारास्ति जालन्धरे ॥७॥

नरा भां सुतारां परां वर्णयन्तम्,
विनिन्दन्तु नन्दन्तु येषां यथेष्टम्।
अहं तेऽत्र जालन्धरे वासमीहे,
कृपा वा कृपा वा यथेच्छा तथास्ताम् ॥८॥

पं० रामकृष्ण शर्म्मा, सुजानपुर, टीहरा, कांगड़ा।

जगन्माता ज्वाला निखिलसुखसम्पत्तिवसति
र्जनैर्नित्यं ध्याता विपुल-मतिर्या स्वहृदये
महामाया माया मुनि-वर-सहाया सु-फलदा
विभातीहाद्रौ सा धृतकनकच्छत्रा शिखरिणी ॥१॥
यदीयां वै पुण्यां विविधगुणगर्भामवितथाम्
समाकर्ण्याख्यातिं त्रिभुवनसुगीतां बुधजनैः।
समायातैर्दूरात् प्रतिपदमनुस्मृत्य चकितै-
स्ततो दृष्ट्वा गीता विमल मनसा सा शिखरिणी ॥२॥
सुधाधारा सारा सकलजनताराधनधरा
श्रुता या वै धन्या विविध गुणगम्या च ललिता।
ततो ज्वाला मातावदखिलमनोज्ञा प्रतिपदम्
बुधैर्दृष्ट्वा गीता विमल मनसा सा शिखरिणी ॥३॥

कृपाराम शास्त्री, धर्मशाला, कांगड़ा।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

संयाच एनां सुरसेव्यमानां तारां महामोह विनाशिनीं
भूयात्सदा सज्जनतोषिणीयं गीर्वाणगीर्गूढगिरां गरिष्ठा

पं० कृपाराम शर्मा उपाध्याय अध्यापक स० घ०
पाठशाला, नगरोटा, बगवां

नरवरवराङ्गहारे नवतरघनरुचे जगत्सारे।
तवपदकमलवरे विमले भक्तिस्सदाऽस्तु मे तारे॥

यावच्छब्दबलं तदर्थघटना संघट्टने यद्बलम्।
बुद्धेः शास्त्रविचारसाविधृते यावद्बलं प्रस्फुटम्॥

यावद्दैशिकसेवनातिशयतः प्राप्तं तु विद्याबलम्।
तावत्ते भवतारिणि स्तुतिविधौ शक्तास्ति गीर्वाणगीः

या ब्रह्मविष्णुशिवसूर्यगणाधिनाथ।
मुख्यामरेन्द्रनिकरैः परिपूजिताङ्घ्रिः॥

धर्मार्थकामसुखधामसुदानदक्षा।
सा कालिका भवतु मे परिपालनाय॥

महिम्ना ते व्याप्तं जददिदमशेष नगसुते।
न यद्वाप्यं व्याप्त्या निगमगणभूतेरपि शिवे॥

परा प्रत्यग्व्याप्तेर्वियति परितो व्याप्तिरमला।
त्वदीया वाग्व्याप्तिर्भवति भवतप्ते शिखरिणी॥

मातस्तारिणि तारिणी प्रणमतां संसारवारां निधेः।
वाग्व्यापारविधावलं प्रतिपदं त्वन्नाम जुष्टं वचः॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अस्माकं सततं त्वदीय कृपया वृन्दारकेन्द्रैः स्तुते ।
भावस्त्वत्पदपङ्कजेऽस्तु वसतां पीठेऽत्र जालन्धरे ॥

उपाध्यायो जयदेवः (मण्डी)

भुवं क्रात्वा तिष्ठन् वसतिरमराणां प्रियतरा ।
जगत्पूज्यो रम्यः श्वश्रुर इति गीतः पशुपतेः ॥
हिमैश्छन्नो नित्यं द्रविणमिव भूमेरधिगतः ।
विभात्युच्चैःश्वर्यो हिमगिरेरयायं शिखरिणी ॥१॥
ऐशान्यां दिशि वैद्यनाथसदनं तारापुरश्चाग्रतः ।
वारुण्यां भवभञ्जनी भगवती वज्रेश्वरी राजते ॥
याम्याञ्चापि प्रकाशते भवभरा ज्वालामुखी सर्वदा ।
इत्थं दिव्यपदाश्रितां स्थितिमिमां पश्यामि जालन्धरे॥२॥
परम्परीणस्तु कुलस्य धर्मः गुरोर्निदेशश्च शुभस्य हेतुः ।
आदेश आम्नाय मतानुकूलः सर्वैरभिज्ञैः परिपालनीयः ॥३॥
भवाब्धिमग्नस्य भयापहारे ! पदाश्रितस्यापि समस्तसारे !
दुःखाम्बुधेर्भक्तजनस्य तारे ! त्वमेव नित्यं प्रतिभासि तारे ॥

पं० गुरुभक्तशर्मा वनूरीय श्रीजयचन्द्रतारिणी-
संस्कृतपाठशालाप्रधानाध्यापकः ।

सेव्यो खर्वयशस्कशास्त्ररसिका नाको भवद्भिस्तु किम् ।
बाढं चेच्चिनुते हनुर्जनितरो धर्मास्तदा तोयजान् ।
स्वर्गं क्षीणफलं विलोक्य यदि वः कामोऽपवर्गोऽस्ति भोः ।
ध्यायन्तां चरणौ तु चेतसि हरेः संस्थित्य जालन्धरे ॥१॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ध्येयौ कौ सुचिरं जनैर्मुररिपोः पुण्यांघ्रिपद्मौ सदा ।
पेयं किं भुवि भाति तापशमनं तत्कीर्तिपीयूषकम् ॥

जाप्यं किं मनसा प्रतिक्षणमरं तन्नामपूतं परम् ।
का पठ्या द्विजपोतकैः प्रतिदिनं ह्येषात्र गीर्वाणगीः ॥२

कामादिमत्स्यैः कृतसम्प्रचारे तृषादितोये सुतरामपारे ।
संसारवार्धौ पतितं सुहारे मां पाहि दुर्गे ! जगदीशि ! तारे

यदा भूयाज्जन्तोस्तरणितनया तीरवसति-
र्निवृत्तस्याभोगैर्जनितबहुरोगैर्धृतिमतो ।
हरे राधाप्राणेश्वर नगधरेति प्रजपत-
स्तदाभ्यर्थ्या न स्यात्सकलसुरसेव्या शिखरिणी ॥४

यतिप्रधानाः ! महती मदीया प्राभ्यर्थनेयं भवदङ्घ्रिपद्मे-
ष्वयं समस्यातरुरेधमानश्शश्वद्भवद्भिः परिपालनीयः ॥५

पं० पद्मनाभशर्म्मा संस्कृतपाठशालाध्यापकः
नगरोटा (काङ्गड़ा

त्राता यथा द्रुपदजा परिक्लिश्यमाना ।
दुर्योधनप्रभृतिदुष्टनृपैः सभायाम् ॥

कामादिदुष्टखलसन्तपितोऽहमीश ।
हे यादवेश्वर हरे परिपालनीयः ॥१॥

मखे ध्वस्ते शक्रः प्रलयकरमेघैर्व्रजभुवः ।
विनाशेच्छुर्वर्षन् मुसलमितधाराभिरभितः ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

करे कृत्वा गोत्रं प्रविशतु जनोधो गिरिभुवः।
हरिः सर्वानूचे नहि पतति गौत्री शिखरिणी ॥

पुरोहितो वामनशर्म्मा (मण्डी)

पापानां क्षयहेतुरत्र विहिता यस्यापरा शुद्धधीः।
लीलाविग्रहमानुषाकृतिविधौ यस्याशुशुद्धास्ति भीः॥
भक्तानां भयभञ्जनेऽरिमथने नाशङ्किता यस्य ह्रीः।
तस्यैवेह विभोः भवाब्धितरणे गीतास्ति गीर्वाणगीः॥

पं० पुलस्त्यराम मिश्रः काङ्गड़ा ॥

सफलविबुधसंघैः कथ्यसे या द्वितीया।
रिपुकुलशरपाते वर्तसे चाद्वितीया ॥
पदविनतजनानां कामदा त्वं हि तारे
तदहमिह सुविद्यां कामये लोकतारे ॥

वि० कृपाराम शर्म्मा (छत्तर)

कान्तारूपेऽत्र जगत्प्रपञ्चे कामादिकैः सिंहगजैः समेते।
भयास्पदे भीतियुतः सदैव तारे! त्वयाहं परिपालनीय
गीर्वाणगीरसनिमग्नमनः सदैव।
मातस्त्वदीयपदभक्तिरतो नितान्तम् ॥
जालन्धरेऽत्रसततं वसति प्रपन्न-
स्तारे! त्वयाहमनिशं परिपालनीयः ॥
भगवति! तव पादासक्तमेतन्मदीयम्।
तृषितमधुपतुल्यं मानसं पङ्कजेषु ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पदविनतजनानां रक्षिके ! शक्तिरूपे !
त्वमसि मम शरण्या तारिके तारतारे !

पुरोहितो यौवनप्रसाद शर्म्मा (विजयपुर, काङ्गड़ा।

श्यामावदाता सितपत्रनेत्रा, दिगम्बरा काविवरास्यभीका।
नित्यं स्फुरेत्साहृदयान्तराले, प्रवर्तते में हृदयान्तराले ॥

संसारचक्रक्रकचैर्विशीर्णं मनस्तुरङ्गं करुणाकटाक्षैः ।
यन्तुं गुरुर्मे सततं दयेत प्रवर्तते मे हृदयान्तराले ॥

पं० सोमदत्तशर्म्मा वेदशाला, वैजनाथ, कांगड़ा

गीर्वाणगीः शिखरिणी खलु राष्ट्रभाषा ।
भूयात्सदा शुभकरी सततं जनानाम् ॥
जालंधरे निवसतां विदुषां सुतारे ।
कामो मदीय इति ते परिपालनीयः ॥

बदरीदत्त शर्म्मा ठाणाग्रामस्थ कांगड़ा।

खलैः सभायां किल धार्तराष्ट्रैराकृष्टकेशा द्रुपदात्मजासा।
जगाद शौरे मम पातिव्रत्यधर्मस्त्वयैव परिपालनीयः ॥

पं० जगन्नाथ शर्म्मा संस्कृत पाठशाला नगरोटा बगवां

१—तारे! जय जय नीलसरस्वति! जय मातर्जय पिङ्गजटे

करयुगलद्वयखड्गेन्दीवरकर्तरिकर्परशस्त्रधरे !
शिवशवहृदि धृतपदनखमणिकरकरमिषतोऽभयदानरते।
त्रिजगत्तारिणि शर्वविहारिणि ! दानवदारिणि जय वरदे।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

२—तारे ततार जनता जनतापहन्त्रि
त्वत्पादपद्मपरिपूजनपूतपापा ।
केनाम्ब ! वाथ शरणागतपालनस्य
धर्म्मो विनात्रभवतीं परिपालनीयः ॥

३—वेदेषु वित्तो महितैर्मुनीन्द्रै-
रन्वीक्ष्य शास्त्रे विशदीकृतो यः ।
पुराणसाहित्यकथासु गीतः
स एष धर्म्मः परिपालनीयः ॥

४—क्रूरे कलौ कुटिलनीतिपरा महीशाः,
कर्म्माणि कल्मषभृतानि मनोऽप्यवश्यम् ।
तत्रापि दुर्भरतमोदरपूरचिन्ता-
धर्म्मः कथं वदथ रे ! परिपालनीयः ॥

५—त्रिगर्तनृपनन्दिनी निखिलनागभोगावनिः[1],
पिनद्धघनपादपच्छविनिपीतगारुत्मता ।
पराकृतसुरालयाऽप्युपरिदृष्टदुर्गालया-
त्रिगर्तसुषमावनी वसति कापि जालन्धरे[2]

६—स्फुरद्द्रवहिमोपलप्रलुठदिन्द्रनीलोपल-
च्छविच्छुरितनीरसूः स्फुरदनन्तभोगभ्रमिः[3] ।

---

१ नागवनम् । २ शेषनागशरीरम् । ३ जालन्धरना-
म्नि पीठे ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वरुह्य शनकैरिव प्रखरगण्डशैलश्रथा[1]
व्यथामिव विपाड्[2] वहत्यधिकमेत्य जालन्धरे ॥

७—कुलूतचुलुकीकृता तदनु मण्डपैर्मर्दिता
पुलिन्ददलदोलिताऽप्यधमधीवरैर्धर्षिता ।
इतीव कुपितान्तरा कलुषिताऽथ वाव्रज्यते
प्रताडिततटी विपाड् विकट मेत्य जालन्धरे ॥

८—तूलं तूलमरे ! घृतं घृतमहो ! हैयङ्गवीनं, जडा-
नैवं भो, रजतं न, रे ! दधि. सखे ! फेनं नदीनामदः ।
इत्थं शीतदिनेषु पर्वततति दृष्ट्वा हिमानीभृतां
क्रीडार्थं मिलिता मिथः शिशुगणा जल्पन्ति जालन्धरे ॥

९—जालन्धरे शिखरिणी सुविशालशैल-
माला, हिमोपरिकरम्बितमेघमाला ।
आलोक्यते, हरितपर्णभरावनम्रा
श्वेतप्रसूननिचिताऽलिवृता लतेव ॥

१०—स्मृताऽप्येषा स्वान्तं शमयति नितान्तं रसभृता
कमप्यानन्दं याऽधरपुटनिपीता वितनुते ।
मनो भुक्ताऽप्युत्कं जनयति शरच्चन्द्रचटुला
सखे ! कच्चित्कान्ता, नहि नहि रसाला शिखरिणी ॥

---

१ गिरिच्युतस्थूलोपलाः । २ विपाशा ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

११—लताः पुष्पोद्वासैः शिशिरपवनैर्निर्मलझराः
खगा रम्यारावैर्मृदुसुखशिलाभिः शिखरिणः।
फलैर्वृक्षा मुग्धैर्ललितलपनैर्ग्रामजनताः
श्रमं यत्र प्रोञ्छन्त्यहह! गिरिभूः सा शिखरिणी॥

१२—समन्तादल्पाल्पैस्तुहिनगिरिपादैः परिवृता
वृता वेल्लन्तीभिस्तरलतटिनीभिः शिशरिता।
समीरैः सन्नीरैरसुभृदसुदा शादशवला-
हृताशेषक्लेशा जयति जनिभूर्मे शिखरिणी॥

१३—मृडति मनो न मनागपि तेषां
सरससुभगवनिता रतिकरणी।
न च सुतधनजनराज्यविभूति-
र्यै रसिता मृडभक्तिशिखरिणी॥

१४—परिसरसरलवनीकमनीया
हिमरुचिरुचिधरझररमणीया।
श्यामलशस्यनयनसुखकरणी
जयति धवलगिरिराजि शिखरिणी॥

१५—वितथजनिर्जगतीह जनोऽसौ
व्यर्थनयनसरणिर्मृतचेताः।
जन्मनि येन त्रिगर्तगताऽस्मि-
न्नाकलिता गिरिभूर्न शिखरिणी॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

१६—चम्पककुटजजातिगिरिमल्ली-
कुसुमसुरभयः शिशिरसमीराः ।
तारापुरमभिवान्ति, मनोज्ञा
भाति शाखिततिरुच्चशिखरिणी ॥

१७—वैद्यनाथ ! भव ! नाथ ! पुरारे !
मृड ! महेश ! गिरिजेश ! गजारे !
भवतु भवे परकेऽपि हरोमे !
जन्मभूमिरियमेव शिखरिणी ॥

(पादाकुलकपञ्चकम्)

१८—पिधानं धर्म्माणां, धनपतिदिशं व्याप्य सकला-
म्प्रविष्टा पाश्चात्यां, कृषिफलकरी भारतभुवः ।
सदा रक्षादक्षा विविधखनिराशिः सुविषमा
नदीनामुद्भूतिस्तुहिनगिरिराजिः शिखरिणी ॥

१९—प्रत्यग्वार्धिसमुत्थझर्झररवोद्गारैररम्भैरवै-
र्वातैः कर्कशैर्नृणां निपिहितं चक्षुस्सदालोचकम् ।
यातास्ताचलमातुरा रसिकता नष्टा गुणग्राहिणो
हा हा शोकं! मरी हरे ! मर मिटी कुत्राऽस्ति गीर्वाणगीः॥

२०—सर्वभाषाप्रसूरस्ति गीर्वाणगीः,
शर्मदा गीर्नमस्येह गीर्वाणगीः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सर्वदा सर्वदा बाणगीर्बाणगीः,
सा नमस्या समस्यापि गीर्वाणगीः ॥

हरिचरणशास्त्रिणस्त्रैगर्तस्य ॥

नीलेन्दीवरकान्ते शशिधरकान्ते नखेन्दुरुचिरां ते ।
पदकमलरुचिमुदारे जगदाधारेऽभिवादये तारे ! ॥१॥

शशाङ्कांशुच्छेदैरिव मृदुलसत्तण्डुलवरैः,
पचेयं किं भक्तं प्रिय ! विविधसद्व्यञ्जनयुतम् ?
न न, प्रेमाधारे ! त्वमिव बहिरन्तारसमयी,
ममेष्टा सम्पाद्या मधुरिमधुरीणा शिखरिणी ॥२॥

लोकवृत्ते गते सर्वथा पर्ययम्,
दुर्लभे भोजने, दुष्करे जीवने ।
रोग में, शोक में सूखते हैं सभी,
केन सा सेव्यतां हन्त ! गीर्वाणगीः ॥३॥

"मोटियां रोटियां मूल ना भांदियां
मां, मुझे दाल में *टेस्ट आता नहीं ।
†केक्स आर् डेण्टिअर्" इत्यमालम्ब्यते
भाषणे सङ्कुरः सभ्यजालन्धरे ॥४॥

---

* Taste = स्वाद ।

† Cakes are daintier = केक (एक अंग्रेज़ी मिठाई) अधिक स्वादिष्ट है ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रोगाः शुचां सपदि सन्नहना हसन्ति,
सर्वत्र दुःखदहना गहना भवन्ति ।
मृत्युः करोति कवलं जनता जवेन,
लोकः परेश ! विपदः परिपालनीयः ॥५॥

रामचन्द्रशास्त्रिणः "कुशलस्य" ॥

गिरौ शीताधिक्यं हिममपि च सर्वत्र पतति
स्थले घर्माधिक्यं प्रसरति सदा स्वेदविसरः ।
समुद्रे नक्राद्या जलमपि गभीरं च नितराम्,
विधे! स्थित्यै किं स्यादिह? शृणु शिशो! सा शिखरिणी ॥

गृहस्थे मग्नानां वद सुखकरी का नु ? तरुणी ।
जले प्राणाँस्त्रातुं प्रभवति सदा का नु ? तरणी ॥
अरण्ये यातानां सुखमुपहरेत् का नु ? हरिणी ।
कवित्वे सक्तानां मुदमुपनयेत् का ? शिखरिणी ॥२॥

आज्ञानुकूलचरितो गृहरक्षकश्च,
प्राणैरपि प्रभुहितार्थसमुद्यतो यः ।
छायेव सर्वसमयेऽनुचरश्च यः स्याद्,
दासस्सदा स *प्रभुणा परिपालनीयः ॥३॥

औदार्यशौर्यविनयार्जवदर्शनीयो
जातोऽस्ति येन धनिनामपि माननीयः ।

---

* प्रह्वे वा ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भूयश्च येन नृपतेरपि वन्दनीयो
विद्यानिधिः स विदुषा परिपालनीयः ॥४॥

धर्मज्ञा नितरां स्वधर्मनिरता धर्मस्य पारं गता
विद्वांसोऽखिलवेदशास्त्रनिकषा धीरा गभीराः सदा ।
दातारो धनिनः परोपकरणे रक्ता दरिद्राश्रया
वैद्या व्याधिविकारवारणचणाः सर्वेऽपि जालन्धरे ॥५॥

वन्दिता सर्वलोकैः सदा सर्वथाऽऽ-
लिङ्गिता या कवीन्द्रैर्वदान्यैः पुरा ।
मण्डिता योपमाद्यैरलङ्कारकैः
सेवनीया सता सैव गीर्वाणगीः ॥६॥

आ जमाना बड़ा ए निराला गया,
*इन् दि कौन्फ्लिक्ट टू हार्ड फौर् एविवन् ।
एक को दूसरे की भला क्या पड़ी,
कः प्रयस्येद् गता कुत्र गीर्वाणगीः ॥७॥

संस्कृतभूषणस्य शुचिव्रतशास्त्रिणो
लक्षणपालस्य,

---

* In the conflict too hard for everyone.
(इस हर एक के लिए अति कठिन जीवन संग्राम में ।)

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शुद्धिपत्रम्

पृष्ठे	पंक्तौ	अशुद्धम्	शुद्धम्
२	१	विज्ञप्ति	विज्ञप्तिः
४	१८	जालेन्धरे	जालन्धरे
२	५	जान्धरे	जालन्धरे
"	५	नीलसज्ञे	नीलसंज्ञे
०	२	परायणततां	परायणतां
"	१०	स्वम्भातः	स्वम्भातः
३	५	प्रतिपदमयं	प्रतिपदमियं
५	१५	सहासः	संहासः
६	१७	तदोषाय	तदा दोषाय
७	७	छस्कमेकं	छन्दस्कमेकं
३	८	नगस्थोऽसौ	नगस्थो
"	९	यं	यो
"	९	मस्यदीयैः	कोऽस्मदीयैः
५	४	वर्धि०	वार्धि०
५	११	मतिर्या	मतिभिर्या
६	८	विचारसा०	विचारसार०
"	१५	जददिदमशेष	जगदिदमशेषं
१९	९	सफल०	सकल०
"	१५	परिपालनीय	परिपालनीयः
३३	२	विपाड्	विपाड्

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

C-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अग्रे पूरणीयं समस्याषट्कम् ।

१—सदोम् ।

२—दुन्दुभिनाद एषः ।

३—कल्पलतिके ।

४—अर्प्पयामि ।

५—त्रिगर्त्तप्रदेशे ।

६—समस्या ।

७—प्रावृड्वर्णनम् ।

प्रेषणस्थानम्—

स्वामी तारानन्दतीर्थः

श्रीतारापुरस्थस्वतन्त्रकविमण्डलसंस्थापकः

पो० बैजनाथ, जिला कांगड़ा ॥

☞ पूरयितृभिः समस्यापदानि पद्यानामन्त एव योजनीयानि, नान्यत्र ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

C-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangot

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri